# sItArAmastotra

# સીતારામસ્તોત્ર

## Document Information

Text title : hanUmatkRita sItA rAma stotram

File name : sItArAmastotra.itx

Category : raama, stotra, devii, sItA, devI

Location : doc_raama

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : November 14, 2008, August 30, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સીતારામસ્તોત્ર

અયોધ્યાપુર-નેતારં મિથિલાપુર-નાયિકામ્ ।
રાઘવાણામલઙ્કારં વૈદેહાનામલઙ્ક્રિયામ્ ॥ ૧॥

રઘૂણાં કુલદીપં ચ નિમીનાં કુલદીપિકામ્ ।
સૂર્યવંશ-સમુદ્ભૂતં સોમવંશ-સમુદ્ભવામ્ ॥ ૨॥

પુત્રં દશરથસ્યાદ્યં પુત્રીં જનકભૂપતેઃ ।
વશિષ્ઠાનુમતાચારં શતાનન્દમતાનુગામ્ ॥ ૩॥

કૌસલ્યાગર્ભ-સમ્ભૂતં વેદિગર્ભોદિતાં સ્વયમ્ ।
પુણ્ડરીક-વિશાલાક્ષં સ્ફુરદિન્દીવરેક્ષણામ્ ॥ ૪॥

ચન્દ્રકાન્તાનનામ્ભોજં ચન્દ્રબિમ્બોપમાનનામ્ ।
મત્ત-માતઙ્ગ-ગમનં મત્ત-હંસ-વધૂ-ગતામ્ ॥ ૫॥

ચન્દનાર્દ્ર-ભુજામધ્યં કુઙ્કુમાર્દ્ર-કુચસ્થલીમ્ ।
ચાપાલઙ્કૃત-હસ્તાબ્જં પદ્માલઙ્કૃત-પાણિકામ્ ॥ ૬॥

શરણાગત-ગોપ્તારં પ્રણિપાદ-પ્રસાદિકામ્ ।
કાલમેઘનિભં રામં કાર્તસ્વર-સમ-પ્રભામ્ ॥ ૭॥

દિવ્ય-સિંહાસનાસીનં દિવ્ય-સ્રગ્વસ્ત્ર-ભૂષણામ્ ।
અનુક્ષણં કટાક્ષાભ્યાં અન્યોન્યેક્ષણ-કાઙ્ક્ષિણૌ ॥ ૮॥

અન્યોન્ય-સદૃશાકારૌ ત્રૈલોક્યગૃહદમ્પતી ।
ઇમૌ યુવાં પ્રણમ્યાહં ભજામ્યદ્ય કૃતાર્થતામ્ ॥ ૯॥

અનેન સ્તૌતિ યઃ સ્તુત્યં રામં સીતાં ચ ભક્તિતઃ ।
તસ્ય તૌ તનુતાં પુણ્યાસ્સમ્પદઃ સકલાર્થદાઃ ॥ ૧૦॥

એવં શ્રીરામચન્દ્રસ્ય જાનક્યાશ્ચ વિશેષતઃ ।
કૃતં હનૂમતા પુણ્યં સ્તોત્રં સદ્યો વિમુક્તિદમ્ ।

યઃ પઠેત્પ્રાતરુત્થાય સર્વાન્ કામાનવાપ્નુયાત્ ॥ ૧૧॥

॥ ઇતિ હનૂમત્કૃત-સીતારામ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

*sItArAmastotra*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*